ईषदयः-दुरयः-स्वयः ; —

[1]ईयमानः, आय्यमानः, ईषिष्यमाणः ;

[2]अयः, [3]आयः, आयः, ईषिषः ;

एतुम्, आययितुम्, ईषिषितुम् ;

इतिः, आयना, ईषिषा, आयियियिषा ;

अयनम्, आयनम्, ईषिषणम् ;

इत्वा, आययित्वा, ईषिषित्वा ;

समित्य, [4]उपेत्य, समाय्य, समीषिष्य ;

आयम् २ } आयम् २ } ईषिषम् २ }
इत्वा २ }, आययित्वा २ }, ईषिषित्वा २ } ;

## (62) "इक् स्मरणे" (II-अदादिः-1047-सक. अनिट्-पर.)

'अयत्येतीयते गत्यां, अधीतेऽध्येति चेङिकोः ।' (14) इति देवः ।

**नित्यमधिपूर्वकः ।**

अध्यायकः-यिका, [5]अधिगमकः-मिका, [6]अधिजिगमिषकः-षिका ;

अध्येता-त्री, अधिगमयिता-त्री, अधिजिगमिषिता-त्री ;

[A]अधीयन्-न्ती, अधियन्, अधिगमयन्-न्ती, अधिजिगमिषन्-न्ती ;

अध्येष्यन्-न्ती-ती, अधिगमयिष्यन्-न्ती-ती, अधिजिगमिषिष्यन्-न्ती-ती;

— अधिगमयमानः, अधिगमयिष्यमाण ;

---

1. 'अकृत्सार्वधातुकयो –' (7-4-25) रिति दीर्घः ।
2. 'एरच्' (3-3-56) इति भावेऽच् ।
3. 'अकर्तरि च कारके–' (3-3-19) इति घञ् ।
4. 'षत्वतुकोरसिद्धः' (6-1-86) इत्येकादेशशास्त्रस्यासिद्धत्वात् तुक् ।
5. 'णौ गमिरबोधने' (2-4-46) 'इण्वदिकः' (वा. 2-4-45) इत्यतिदेशात् गमादेशः । अमन्तत्वेन मित्त्वात् 'मितां ह्रस्वः' (6-4-92) इति उपधाह्रस्वः । अन्यत्र–बोधने **प्रत्याययकः-यिका-प्रत्यायितम्**–इत्यादि ।
6. 'सनि च' (2-4-47) इति गमादेशः । 'गमेरिट् परस्मैपदेषु' (7-2-58) इतीडागमः । बोधने तु **प्रतीषिषकः** इत्यादि ।

A. 'सूतोऽपि गङ्गासलिलैः पवित्वा सहाश्वमात्मानमनल्पमन्युः । ससीतयो राघवयोरधीयन् श्वसन् कदुष्णं पुरमाविवेश ॥' भ. का. 3-18 'इण्वदिकः' (वा. 2-4-45) इति अतिदेशेन 'इणो यण्' (6-4-81) इत्यत्र यणा भाव्यम् । तदानीं 'अधियन्' इति रूपमिति केचित् ।